# gaNanAyakAShTakam

# ગણનાયકાષ્ટકમ્

## Document Information

Text title : Gananayakashtakam

File name : gaNanAyak8.itx

Category : aShTaka, ganesha

Location : doc_ganesha

Proofread by : NA

Description-comments : Shri Vighneshvarastutimanjari Part 1, p211. From stotrArNavaH 01-04

Latest update : November 5, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2022

*sanskritdocuments.org*

# gaNanAyakAShTakam

## ગણનાયકાષ્ટકમ્

એકદન્તં મહાકાયં તપ્તકાઞ્ચનસન્નિભમ્ ।
લમ્બોદરં વિશાલાક્ષં વન્દેઽહં ગણનાયકમ્ ॥ ૧॥

મૌઞ્જીકૃષ્ણાજિનધરં નાગયજ્ઞોપવીતિનમ્ ।
બાલેન્દુસુકલામૌલિં વન્દેઽહં ગણનાયકમ્ ॥ ૨॥

અમ્બિકાહૃદયાનન્દં માતૃભિઃ પરિવેષ્ટિતમ્ ।
ભક્તિપ્રિયં મદોન્મત્તં વન્દેઽહં ગણનાયકમ્ ॥ ૩॥

ચિત્રરત્નવિચિત્રાઙ્ગં ચિત્રમાલાવિભૂષિતમ્ ।
ચિત્રરૂપધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૪॥

ગજવક્ત્રં સુરશ્રેષ્ઠં કર્ણચામરભૂષિતમ્ ।
પાશાઙ્કુશધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૫॥

મૂષકોત્તમમારુહ્ય દેવાસુરમહાહવે
યોદ્ધુકામં મહાવીર્યં વન્દેઽહં ગણનાયકમ્ ॥ ૬॥

યક્ષકિન્નરગન્ધર્વૈસ્સિદ્ધવિદ્યાધરૈસ્સદા
સ્તૂયમાનં મહાબાહું વન્દેઽહં ગણનાયકમ્ ॥ ૭॥

સર્વવિઘ્નહરં દેવં સર્વવિઘ્નવિવર્જિતમ્ ।
સર્વસિદ્ધિપ્રદાતારં વન્દેઽહં ગણનાયકમ્ ॥ ૮॥

ગણાષ્ટકમિદં પુણ્યં યઃ પઠે સતતં નરઃ
સિદ્ધ્યન્તિ સર્વકાર્યાણિ વિદ્યાવાન્ ધનવાન્ ભવેત્ ॥ ૯॥

ઇતિ શ્રીગણનાયકાષ્ટકં સમ્પૂર્ણમ્ ।

*gaNanAyakAShTakam*

pdf was typeset on October 3, 2022

Please send corrections to *sanskrit@cheerful.com*